International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(1): 255-256
© 2026 IJMH
www.themultijournal.com
Received: 09-02-2026
Accepted: 25-02-2026
Publish : 27-02-2026

**डॉ आयुष दीक्षित**
सहायक प्राध्यापक,
साहित्य विभाग,
केन्द्रीय संस्कृत विश्वविद्यालय,
श्रीं राजीव गान्धी परिसर,शृङ्गेरी,
कर्नाटक

**Correspondence:**
**डॉ आयुष दीक्षित**
सहायक प्राध्यापक,
साहित्य विभाग,
केन्द्रीय संस्कृत विश्वविद्यालय,
श्रीं राजीव गान्धी परिसर,शृङ्गेरी,
कर्नाटक

# प्रतिभायाः काव्यहेतुत्वम्

**डॉ आयुष दीक्षित**

**शोधसारः –**

अस्मिन् शोधपत्रे अलङ्कारशास्त्रपरम्परायां स्वीकृतस्य प्रमुखकाव्यहेतोः 'प्रतिभा' इत्यस्य स्वरूपं प्राधान्यं च विस्तरेण विवेचितम् अस्ति। काव्यं तावत् कार्यम् अस्ति, कारणं विना च कार्यस्य उत्पत्तिः असम्भवा। अलङ्कारशास्त्रिणः काव्यनिर्माणाय प्रतिभा-व्युत्पत्ति-अभ्यासान् कारणत्वेन स्वीकुर्वन्ति, परन्तु तेषु प्रतिभा एव सर्वप्रधाना अनिवाया च अस्ति। आचार्यभामह-दण्डि-वामनादिभिः प्राचीनैः तथा च आनन्दवर्धन-मम्मट-राजशेखर-पण्डितराजजगन्नाथादिभिः आचार्यैः प्रतिभायाः स्वरूपं, तस्याः भेदप्रभेदाः, कवित्वे तस्याः अनिवार्यता च सुप्रतिपादिता। इयं प्रतिभा अपूर्ववस्तुनिर्माणक्षमा, नवनवोन्मेषशालिनी प्रज्ञा तथा च जन्मान्तरीयसंस्काररूपा भवतीति शोधपत्रेऽस्मिन् विभिन्न-शास्त्रीयप्रमाणानां साहाय्येन सिद्धं कृतं वर्तते। वस्तुतः व्युत्पत्त्यभ्यासयोः सत्त्वेऽपि प्रतिभामन्तरा न कोऽपि सत्काव्यं रचयितुं शक्नोति, अतः सैव मुख्यः काव्यहेतुः इति निष्कर्षः।

**कूटशब्दाः –**

प्रतिभा, काव्यहेतुः, अलङ्कारशास्त्रम्, , नवनवोन्मेषशालिनी प्रज्ञा, काव्यप्रकाशः, रसगङ्गाधरः, काव्यमीमांसा, कारयित्री-भावयित्री, जगन्नाथः, मम्मटः, आनन्दवर्धनः, राजशेखरः ।

काव्यहेतुर्नाम कवीनां तादृशी शक्तिः, यया ते काव्यन्यसनसामर्थ्यं लभन्ते। जगत्यस्मिन् नित्याः कार्याश्चेति विभाजनेन पदार्थानां द्वैविध्यं प्रतीयते। नित्यास्तु उत्पत्तिविनाशरहिताः गगनादयः, कार्याश्च उत्पत्तिविनाशसहिताः घटपटादयः। काव्यं तावत् कार्यमेव इति सुस्पष्टम्। कारणेन विना कार्योत्पत्तिरसम्भवा इति दर्शनवाङ्मये सुविख्यातमेव, कारणञ्च अन्यथासिद्धिशून्यत्वे सति कार्यनियतपूर्ववृत्तित्वम् इति नैयायिकाः। अलङ्कारशास्त्रे काव्यनिर्माणसामर्थ्यम् आप्तुं कारणानि सुप्रतिपादितानि। तत्र चालङ्कारशास्त्रपरम्परायां नैके शास्त्रमर्मज्ञाः आचार्याः विविधरीत्या बहूनां काव्यहेतुनामुपस्थापनपूर्वकं स्वमतान्युपस्थापयन्ति। बहूनां काव्यहेतूनां सत्स्वपि प्रामुख्यं कस्येति विचारस्तावदस्य शोधपत्रस्य ध्येयोऽस्ति। अलङ्कारशास्त्रस्य आप्राचीनकालात् अर्वाचीनसाहित्यं यावत् काव्यहेतुविचारे कविगता विशिष्टा काचित् नवनवोन्मेशशालिनी प्रज्ञा प्रतिभा इति नाम्ना प्रामुख्यमाप्नोति। प्रतिभाति विलक्षणः शब्दो विलक्षणश्चार्थोऽनया इति व्युत्पत्या विलक्षण-शब्दार्थोपस्थितिकारिणी बुद्धिः। इयमेव प्रतिभा अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा। शक्तिः, दैवीशक्तिः, प्रज्ञा वेत्यादिभिः पर्यायैः प्रतिभा अलङ्कारशास्त्रपरम्परायामस्यां दरीदृश्यते। पूर्वजन्मनः संस्काराणां परिपाकेन परिपुष्टा प्रतिभा एव कविशक्तिः। उक्तञ्च वक्रोक्तिजीवितकारेण "**प्राक्तनाद्यतन-संस्कार-परिपाकप्रौढा प्रतिभा काचिदेव कविशक्तिः**।" प्रतिभा जन्मजन्मातरैः सञ्चिता भूत्वा संस्काररूपेण कवेः सूक्ष्मशरीरे विद्यमाना सती अनुकूलवातावरणे उद्बुद्धा जायते। काव्यालङ्कारकर्तुः भामहदिशि गुरोरुपदेशात् जडमतियुतोऽपि शास्त्राध्ययने सामर्थ्यम् आप्नोति, किन्तु काव्यनिर्माणं तु प्रतिभावतः कवेरेव कर्म।

**गुरोपदेशादध्येतुं शास्त्रं जडधिमोऽप्यलम्।**
**काव्यं तु जायते जातु कस्यचित् प्रतिभावतः।।**[1]

भामाहोक्तरीत्या प्रतिभा काव्यस्य अनिवार्यहेतुः, अत्यन्ता विरला च सा प्रतिभा। इदमेवतात्पर्यमस्ति ध्वन्यालोककर्तुः आनन्दवर्धनस्य। तच्च-

**सरस्वती स्वादु तदर्थवस्तु निःष्यन्दमाना महतां कवीनाम्।**
**अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्॥**[2]

रमणीयं तद्ध्वनिरूपरसं प्रवाहमाना महाकवीनां वाणी स्फुरणशीलायाः विरलायाश्च प्रतिभायाः वैशिष्यट्यमेव व्यनक्ति। इयमेव प्रतिभा शक्तिरिति नाम्ना काव्यशास्त्रे प्रसिद्धाऽस्ति। आनन्दवर्धनः शक्तेः महिमानं वर्णयन् कथयति यत् अव्युत्पत्तिकारणजन्यदोषाः कविशक्त्या न भासते, शक्तिविहिनस्य कवेर्दोषस्तु झटित्येव अवभासते।

**अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः।**
**यस्त्वशक्तिकृततस्य स झटित्यवभासते॥**[3]

भामहाचार्यः प्रतिभायाः परं अन्यान् अध्ययनजन्यहेतून् चोपस्थापयति। तद्यथा-

**शब्दश्छन्दोऽभिधानार्था इतिहासाश्रयाः कथाः।**
**लोकोयुक्तिः कलाश्चेति मन्तव्याः काव्यगैह्यंमी।।**
**शब्दाभिधेये विज्ञाय कृत्वा तद्विदुपासनाम्।**
**विलोक्यान्यप्रबन्धांश्च कार्यः काव्यक्रियादरः।।**[4]

लोकशास्त्रकलादीन् विज्ञाय, काव्यतत्त्वज्ञान् च उपास्य, अन्येषां कवीनां प्रबन्धान् च दृष्ट्वैव काव्यनिर्माणं सम्भवतीति भावः। काव्यादर्शे काव्यहेतुनिर्णयप्रसङ्गे दण्डिना उच्यते यत् पूर्वजन्मनः संस्कारेण वासनया वा सम्बद्धाऽस्ति प्रतिभा इति, "**पूर्वावासनागुणानुबन्धि प्रतिभानमद्भुतम्**"। तन्मते स्वाभाविकी प्रतिभा, निर्मला व्युत्पत्तिः, द्रढीयान् अभ्यासश्चेति त्रयः काव्यसम्पदः कारणत्वेन निगद्यते। तद्यथा-

**नैसर्गिकी च प्रतिभा श्रुतं च बहु निर्मलम्।**
**आनन्दाश्चयाभियोगोऽस्याः कारणं काव्यसम्पदा॥**[5]

काव्यालङ्कारसूत्रवृत्तौ वामनेन जन्मना लब्धा प्रतिभा एव प्रमुखकाव्यहेतुः इति स्वीकृतम् "**कवित्वबीजं प्रतिभानम्, जन्मान्तरागतसंस्कारविशेषः कश्चित्।**"[6] रुद्रटः काव्यालङ्कारे काव्यहेतुप्रसङ्गे प्रतिभाव्युत्पत्त्यभ्यासान् स्थानं यच्छति। प्रतिभायाः भेदौ द्वौ तत्र 1. सहजा शक्तिः 2. उत्पाद्या शक्तिः। सहजा शक्तिः कविभिर्जन्मना लब्धा शक्तिः, उत्पाद्यास्तु अभ्यासादिभिर्जायते। अभिनवगुप्तस्तु अभिनवभारत्याम् प्रतिभानं प्राक्तनसंस्कारः मनुते "**अनादिप्राक्तनसंस्कार प्रतिभानमतः।**"[7] अपूर्ववस्तुनः निर्माणे समर्था इयं प्रतिभा इति कथितम् लोचने "**प्रतिभा अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा।**"[8] । काव्यप्रकाशे मम्मटाचार्यः काव्यस्य हेतुत्रयमवदत्। तद्यथा-

**शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।**
**काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे॥**[9]

तैरुच्यते यत्"शक्तिः कवित्व बीजरूपः संस्कारविशेषः" यां विना काव्यं न प्रसरेत् प्रसृतं वा उपहसनीयं स्यात्। लोकस्य, काव्यस्य, शास्त्राणाञ्च सम्यगवेक्षणेन, काव्यतत्त्वविदा सम्यगध्ययनेन च काव्यनिर्माणसामर्थ्यमाप्यते। मम्मटोक्तानि काव्यनिर्माणहेतुभूतानि त्रिणि कारणानि समुदायरूपेण काव्यमुद्भावयन्ति। इत्येतेषु एकस्यापि अभावः काव्यं न जनयति। अत एव त्रयोऽपि हेतुरिति एकवचनान्तपदेन उक्ताः। शब्दानुशासने हेमचन्द्रोऽवदत् "**प्रतिभाऽस्य हेतुः, प्रतिभा नवनवोन्मेषशालिनी प्रज्ञा।**"[10] नवनवोन्मेशशालिनी बुद्धिरेव प्रतिभा, सैव काव्यस्य हेतुरस्तीति। राजशेखरः काव्यमीमांसायां प्रतिभापदार्थं विस्तरेण विवेचयति। तन्मते शक्तिरेव एकमात्रं सर्वश्रेष्ठतत्त्वमस्ति। किञ्च अनेन शक्तिः प्रतिभया व्युत्पत्या च भिन्नाऽस्तीति उच्यते। शक्तिसम्पन्नाः एव कवयः प्रतिभां व्युत्पत्तिश्च लभन्ते। प्रतिभाशालिनश्च कवयः अप्रत्यक्षं प्रत्यक्षवत् पश्यन्ति। राजशेखरोक्तरीत्या प्रतिभायाः भेदौ द्वौ स्तः- **1. कारयित्री प्रतिभा 2. भावयित्रि प्रतिभा** । जन्मना लब्धा प्रतिभा कारयित्री कविना सम्बद्ध्यते, सामाजिकैः पाठकैः सम्बद्धा प्रतिभा भावयित्री। कारयित्री प्रतिभा सहजा, आहार्या, औपदेशिकी इत्येतेषु त्रिषु भागेषु विभक्ताऽस्ति। एतैर्विभागैर्युक्तः कवयः क्रमशः सारस्वतः, आभ्यासिकः, औपदेशिकश्च भवन्ति। सारस्वतानाम् आभ्यासिकानाञ्च कवीनां मंत्रतन्त्रानुष्ठानस्य अपेक्षा तद्वदेव नास्ति यथा पुनः मधुरद्रव्ये स्थापनेन द्राक्षाफलस्य मधुतरत्वं नापेक्षितम्।

प्रतिभायाः एव काव्यहेतुषु प्रामुख्यमिति रसगङ्गाधरे पण्डितराजजगन्नाथेन उच्यते **तस्य च कारणं कविगता केवला प्रतिभा।**[11] प्रतिभा सर्वेषु कविषु भिद्यते, न तु एकरूपा सा। विविधकवीनां जन्मजन्मान्तरीयसंस्कादागता प्रतिभा भिन्ना, अत एव प्रतिभायाः वैलक्षण्येन काव्यगत विलक्षणता दृश्यते। तच्चोक्त-

**"प्रतिभात्वं च कवितायाः कारणतावच्छेदकं प्रतिभागतवैलक्षण्यमेव वा विलक्षणकाव्यं प्रतीति नात्रापि सः।**[12] **तादृशादृष्टस्य तादृशव्युत्पत्त्यभ्यासयोश्च प्रतिभागतं वैलक्षण्यं कार्यतावच्छेदकं, अतो न व्यभिचारः।"**[13]

प्रतिभा अदृष्टादुत्पद्यते, यच्च जन्मान्तरागतसंस्कारविशेषः। क्वचित्तु व्युत्पत्त्याभ्यासवशादायाति। व्युत्पत्त्याभ्यासयोः अभावेऽपि देवादिनां महापुरुषाणां वा प्रसादात् अदृष्टस्य प्राप्तिः दृश्यते, यथा कश्चित् बालकः अल्पवयस्येव व्युत्पत्त्याभ्यासयोः अभावेऽपि काव्यनिर्माणसामर्थ्यं धत्ते। उक्तञ्च पण्डितराजेन-

**तस्याश्च हेतुः क्वचिद् देवतामहापुरूषप्रसादादिजन्ममदृष्टम्, बालादेस्तौ विनाऽपि केवलान्महापुरुषप्रसादादपि प्रतिभोत्पत्तेः।**

**पाद टिप्पणी -**

1. काव्यालङ्कार भामह १/५
2. ध्वन्यालोक १/६
3. ध्वन्यालोक ३/६ वृत्तिभागः
4. तत्रैव १/९-१०
5. काव्यादर्शः १/१०३
6. काव्यालङ्कारसूत्रवृत्ति वामन १/३/१६
7. अभिनवभारती खण्ड 1
8. ध्वन्यालोक लोचन (पृष्ठ 92)
9. काव्यप्रकाश १/३
10. शब्दानुशासन् पृष्ठ २७
11. रसगङ्गाधरः पृष्ठ २७
12. रसगङ्गाधर प्रथमाननम्
13. रसगङ्गाधर प्रथमाननम्